संस्कृतवार्ता:

23.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी तस्य भूटानदेशीय: समकक्ष: शेरिंग तोब्गे चेत्येतौ थिम्पु-नगरे भारतेन सहयोग-प्राप्तस्य अत्याधुनिकस्य मातृ-शिशु-चिकित्सालसस्य उद्घाटनं विहितवन्तौ।

· विदेशमन्त्री डॉ० एस् जयशङ्कर: अद्य त्रि-दिवसीय-यात्रायां सिंगापुरनगरं सम्प्राप्तवान्।

· अन्ताराष्ट्रिय-समुदायेन रूसदेशे जातं आतंकीयाक्रमणं निन्दितम्।

· पञ्जाबराज्यस्य संगरूर-जनपदस्य अनेकेषु ग्रामेषु विषाक्त-मद्य-पानै: विंशतिजनानां मृत्यु: जात:।

· क्रिकेट-प्रतिस्पर्धायां, आई०पी०एल्० इति क्रिकेट-प्रतिस्पर्धा-मलिकायां पञ्जाबकिंग्स-दलेन डेल्हीकैपिटल्स-दलस्य सम्मुखे पञ्चसप्तत्यधिकैकशतं धावनांकानां लक्ष्यं स्थापितम्।

<u>भारत-भूटान</u>

अद्य प्रात: काले प्रधानमन्त्री नरेन्द्रमोदी तस्य भूटानदेशीय: समकक्ष: शेरिंग तोब्गे चेत्येतौ थिम्पु-नगरे ग्यालत्सुएन जेत्सुन पेमा मातृ-शिशु-चिकित्सालयस्य उद्घाटनं विहितवन्तौ। एष: अत्याधुनिक-चिकित्सालय: भारत-सर्वकारस्य वित्त-सहयोगेन निर्मित: अस्ति। अस्य सार्ध-शतम् रोगीशय्यात: सुसज्जीतस्य चिकित्सालयस्य विकास: द्विचरणीय-भारतीय-सहयोगात् जात:। नवनिर्मित: चिकित्सालय: भूटान देशे मातृ-शिशु-स्वास्थ्य-सेवासु वरतर: वृद्धि: करिष्यति। विदेश-मंत्रालय: समुदीरितवान् यत् ग्यालत्सुएन जेत्सुन पेमा मातृ-शिशु-चिकित्सालय: स्वास्थ्य-क्षेत्रे भारत-भूटानयो: सहयोगस्य एकं उज्ज्वलं उदाहरणं अस्ति। उद्घाटन-पुरस्सरं प्रधानमन्त्री मोदी नव-दिल्ली नगरं प्रस्थानं अकरोत। एकस्मिन् आभासीय संदेश-माध्यमेन श्रीमोदी उक्तवान् यत् एषा अतिमहत्वपूर्णा भूटानयात्रासीत् स: तत्र भूटान-नरेश जिग्मे खेसर नामग्याल वांगचुक, प्रधानमन्त्री तोग्बे अन्यै: प्रतिष्ठित-जनै: चेत्येतै: सह सम्मेलनस्य अवसर प्राप्तवान्।

विदेशमन्त्री

विदेशमन्त्री डॉ० एस० जयशङ्कर: अद्य त्रि-दिवसीय यात्रायां सिंगापुरनगरं सम्प्राप्तवान्। सर्वप्रथमम् असौ आई०एन्०ए० इत्याख्ये स्मारके नेताजी-सुभाष-चन्द्र-बोस-वर्याय अपि च भारतीय सेनाया: वीर-सैनिकेभ्य: श्रद्धाञ्जलिम् समर्पितवान्। समाजिक-सञ्चारसन्देश पटले डॉ० जयशङ्कर: प्रोक्तवान् यत् अयं स्मारक: आई०एन्०ए० इत्येतस्य देशभक्ति-साहसयो: च भावनाया: प्रतीको वर्तते यो हि आगामि-वंशपंक्तिभ्य: प्रेरणास्रोतरूपेण भविष्यति।

रूस -आतंकीयाक्रमणम्

अन्ताराष्ट्रिय-समुदायेन रूसदेशे जातं आतंकीयाक्रमणं निन्दितम्। यस्मिन् पञ्चदशाधिकैकशतं जना: दिवंगता: जाता:। संयुक्तराष्ट्र-महासचिवेन एण्टोनियो गुएत्रेस इत्यनेन मॉस्को-नगरस्य क्रोकस-सिटी-हॉल इत्यत्र ह्य: जाते आतंकीयाक्रमणे दु:खम् अभिव्यक्तम्। अपि च, कठोरवचोभि: निन्दापि कृता। संयुक्तराष्ट्रसुरक्षापरिषदि सर्वै: देशै: आतंकीनिग्रहणाय समाह्वानमपि कृतम्। प्रधानमन्त्री नरेन्द्रमोदी अस्य आतंकीयक्रमणस्य भर्त्सनां कृतवान्। अपि च अमरिका-यूरोपीयसंघ-ब्रिटेन-फ्रांस-स्पेन-संयुक्तअरब-अमीरातदेशैरपि निन्दा कृता। फ्रांसदेशीयेन राष्ट्रपतिना इमैनुएल-मैखॉ इत्यनेन पीडितजनेभ्य: सर्वेभ्य: रूसदेशीयेभ्यश्च स्वीयदेशस्य ऐक्यभाव: प्रकटित:। स्पेनदेश: प्रावोचत् यत् मॉस्कोनगरस्य इयं घटना आश्चर्ययुतास्ति तत्रैव इटलीदेशस्य प्रधानमन्त्री जॉर्जिया-मेलॉनी उक्तवती यत् इदम् आतंकवादस्य निन्दनीयकार्यमस्ति। प्रभावितेभ्य: जनै: सह स्वकीय-ऐक्यभावं प्रकटितवती।

पञ्जाब-विषाक्तमद्पानं

पञ्जाबराज्यस्य संगरूर-जनपदस्य अनेकेषु ग्रामेषु विषाक्त-मद्य-पानै: विंशतिजनानां मृत्यु: जात:। आरक्षिदलस्य एकं विशिष्टदलं अस्य प्रकरणस्य निरीक्षणं विदधाति। साम्प्रतं यावत् अष्ट जना: एतस्मिन् प्रकरणे निगडिता: जाता:।

पञ्जाब-वीरगतिदिवस:

अद्य शहीद-ए-आजम-भगतसिंह-राजगुरु-सुखदेव- इत्येतेषां वीरगतिदिवसो वर्तते। अद्यैव एकत्रिंशदधिक नवदशशततमे वर्षे भगतसिंह-राजगुरु-सुखदेव वीर जना: लाहौर सेंट्रल इत्याख्ये कारागृहे वीरगतिं प्राप्तवन्त: आसन्। अत्रावसरे पञ्जाबं समेत्य सम्पूर्णं राष्ट्रं तेभ्य: श्रद्धाञ्जलिं समर्पयति।

मध्यप्रदेश – लोकसभानामांकनं

मध्यप्रदेशे लोकसभानिर्वाचनस्य प्रथमचरणीय मतदानाय नामांकप्रपत्र-प्रक्रियाया: कार्यं प्रचलति। ह्य: दश-प्रत्याशिन: द्वादश नामाङ्कनपत्राणि पूरितवन्त: निर्वाचनाधिसूचनाया: प्रख्यापनस्य अनन्तरं साम्प्रतं यावत् षोडश प्रत्याशिन: एकविंशति नामांकनपत्राणि संपूरितवन्त। प्रथमचरणीय मतदानाय नामांकनप्रपूरण-प्रक्रियाया: अन्तिमं दिनं मार्चमासस्य सप्तविंशतिदिनाङ्क: विद्यते।

हिमाचलप्रदेश

हिमाचल प्रदेशस्य षड् पूर्व-विधायका: केन्द्रीयमन्त्रिण: अनुरागसिंहठाकुरस्य हिमाचलप्रदेशस्य च पूर्व-मुख्यमन्त्रिण: जयरामठाकुरस्य उपस्थितौ अद्य नवदिल्ल्यां भारतीय-जनता-पार्टीतिदले समाविष्टा: जाता:। एते कांग्रेस विधायका: अयोग्या: घोषिता: जाता: आसन्। एते विधायका: सन्ति-सुधीरशर्मा रविठाकुर: इन्द्रदत्त लखनवाल: देवेन्द्रभुट्टो चैतन्यशर्मा च।

छत्तीसगढ़

छत्तीसगढ़स्य दन्तेवाडाजनपदे ह्य: रात्रौ सञ्जाते विस्फोटे बस्तर-फाइटर्स-इत्याख्यस्य द्वौ सनिकौ व्रणितौ जातौ। अस्माकं संवाददाता संसूचितवान् यत् विस्फोटोऽयं तदा सञ्जात: यदा सी०आर०पी०एफ्० – बस्तरफाइटर्स इत्येतेषां संयुक्तदलं किरन्दुल-क्षेत्रे अन्वेषणाभियानं प्रचलद् आसीत्। व्रणितौ सैनिकौ उपचाराय राजधानीं रायपुरं सम्प्रेषितवन्तौ। अत्रावधौ बीजापुर-जनपदस्य पिडिया क्षेत्रे सुरक्षाबल-माओवदिन्यो: मध्ये संघर्षे प्रचलति। द्वौ माओवादिनौ मारितौ एतस्मिन् संघर्षे।

स्विस ओपन

बैडमिण्टन क्रीडायां, स्विस ओपन प्रतिस्पर्धायायां गतरात्रौ स्वीट्जलैण्ड-देशस्य बेसल-नगरे पुरुष-एकल-प्रतियोगिताया: उपान्त्यचक्रं भारतदेशस्य किदाम्बी-श्रीकान्त उत्तीर्ण:। मात्र-पञ्चत्रिंशत-निमिषे श्रीकान्तेन प्रागुपान्त्यचक्रे ली चिया हओ इत्यमूम् एकविंशति-दश, एकविंशति-चतुर्दश इत्येतेतै: अंकै: पराजितवान्। अद्य स्विस-ओपन-प्रतियोगितया: अतिमा-स्पर्धा भारत-देशस्य किदाम्बी श्रीकान्त: लिन चुन-यी चेत्येतयो: मध्ये भविष्यति।

आई०पी०एल्०

क्रिकेट-प्रतिस्पर्धायां, आई०पी०एल्० इति क्रिकेट-प्रतिस्पर्धा-मलिकायां ह्यः रात्रौ औद्घाटिकानायां स्पर्धायां चेन्नई सुपर-किंग्स-दलेन रॉयल-चैलेंजर्स-बेंगलुरुदलं षड्-स्तोभैः पराजितम्। चेन्नैनगरस्य एम्०ए० चिदम्बरम्-क्रीडांगणे रॉयलचैलेंजस्र-बेंगलुरुदलेन वल्लनक्रीडा स्वीकृता। तत्रैव अद्य द्वे प्रतिस्पर्धे प्रचलतः। प्रथमायां स्पर्धायां पञ्जाबकिंग्स-दलं डेल्हीकैपिटल्सदलं सम्मुखीकरोति। सम्प्रति पञ्जाबकिंग्स-दलेन डेल्हीकैपिटल्सदलस्य सम्मुखे पञ्चसप्तत्यधिकैकशतं धावनांकानां लक्ष्यं स्थापितम्। अपि च द्वितीया स्पर्धा कोलकाता-नाइट-राइडर्स दलस्य सनराइजर्स-हैदराबाद-दलेन सह कोलकातायां सार्ध-सप्त-वादनतो भविष्यति।

।। इति वार्ताः ।।